
12077CH12

## द्वादशः पाठः

# विद्यास्थानानि

प्रस्तुत पाठ राजशेखर की काव्यमीमांसा से संगृहीत है। काव्यमीमांसा काव्शास्त्र परम्परा में एक महत्त्वपूर्ण ग्रन्थ है, जिसमें काव्यशास्त्र की विशेष व्याख्या के अतिरिक्त संस्कृत वाङ्मय की सुविस्तृत ज्ञानराशि का परिचय है, जो तत्कालीन भारत के अध्ययन-अध्यापन के विशाल परिदृश्य को प्रकट करता है। इसमें चतुर्दश-विद्याओं के विषय मे चर्चा की गयी है। यहाँ बताया गया है कि वाङ्मय के दो भेद होते हैं। शास्त्र और काव्य। इस ग्रन्थ के आरम्भ में शास्त्र के भेद और उपभेदों का परिगणन किया गया है।

**इह हि वाङ्मयमुभयथा शास्त्रं काव्यं च। शास्त्रं द्विधा-अपौरुषेयं पौरुषेयं च। अपौरुषेयं श्रुतिः। श्रुतिः पुनः द्विविधा-मन्त्राः ब्राह्मणं च। विवृत्तक्रियातन्त्रा मन्त्राः। मन्त्राणां स्तुतिनिन्दाव्याख्यानविनियोगग्रन्थो ब्राह्मणम्। ऋग्यजुःसामवेदास्त्रयी आथर्वणश्च तुरीयः।**




© NCERT not to be republished

**तत्रार्थव्यवस्थितपादाः ऋचः। ताः सगीतयः सामानि। अच्छन्दांस्यगीतानि यजूंषि। ऋचो यजूंषि सामानि चाथर्वणं त इमे चत्वारो वेदाः। इतिहासवेदः धनुर्वेदः गन्धर्ववेदः आयुर्वेदः च उपवेदाः। ''वेदोपवेदात्मा सार्ववर्णिकः पञ्चमो गेयवेदः'' इति द्रौहिणिः। ''शिक्षा, कल्पो, व्याकरणं, निरुक्तं, छन्दोविचितिः, ज्योतिषं च षडङ्गानि'' इत्याचार्याः। ''उपकारकत्वादलङ्कारः सप्तममङ्गम्'' इति यायावरीयः। ऋते च तत्स्वरूपपरिज्ञानाद्वेदार्थानवगतिः। यथा–**

**द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते।**
**तयोरन्यः पिप्पलं स्वाद्वत्ति अनश्नन्न्यो अभिचाकशीति॥**

**तत्र वर्णानां स्थान-करण-प्रयत्नादिभिः निष्पत्तिनिर्णयिनी शिक्षा। नानाशाखाधीतानां मन्त्राणां विनियोजकं सूत्रं कल्पः। सा च युजर्विद्या। शब्दानामन्वाख्यानं व्याकरणम्। निर्वचनं निरुक्तम्। छन्दसां प्रतिपादयित्री छन्दोविचितिः। ग्रहगणितं ज्योतिषम्। पौरुषेयं तु पुराणम्, आन्वीक्षिकी, मीमांसा, स्मृतितन्त्रम् इति चत्वारि शास्त्रणि। तत्र वेदाख्यानोपनिबन्ध-नप्रायं पुराणमष्टादशधा। यदाहुः–**

**सर्गः प्रतिसंहारः कल्पो मन्वन्तराणि वंशविधिः।**
**जगतो यत्र निबद्धं तद्विज्ञेयं पुराणमिति॥**

**''पुराणप्रभेद एवेतिहासः'' इत्येके। स च द्विधा परिक्रियापुराकल्पाभ्याम्। यदाहुः–**

**परिक्रिया पुराकल्प इतिहासगतिर्द्विधा।**
**स्यादेकनायका पूर्वा द्वितीया बहुनायका॥**

**तत्र रामायणं भारतं चोदाहरणे। निगमवाक्यानां न्यायैः सहस्रण विवेक्त्री मीमांसा। सा च द्विविधा विधिविवेचनी ब्रह्मनिदर्शनी च। अष्टादशैव श्रुत्यर्थस्मरणात्स्मृतयः। तानि इमानि चतुर्दश विद्यास्थानानि, यदुत वेदाश्चत्वारः षडङ्गानि, चत्वारि शास्त्राणि इत्याचार्याः।**

**विद्यास्थानानि**

| **वेदाः** | **वेदाङ्गानि** | **शास्त्राणि** |
| --- | --- | --- |
| 1. ऋक् | 5. शिक्षा | 11. पुराणम् |
| 2. यजुः | 6. कल्प | 12. आन्विक्षिकी |
| 3. साम | 7. व्याकरण | 13. मीमांसा |
| 4. अथर्व | 8. निरूक्त | 14. स्मृतितन्त्रम् |
| | 9. छन्दः | |
| | 10. ज्योतिषम् | |

© NCERT not to be republished

# शब्दार्थाः टिपण्यश्च

**वाङ्मयम्** – वाग्जालम्, वाणी प्रपञ्च
**उभयथा** – द्विविधा, दो प्रकार वाला।
**अपौरुषेयम्** – पुरुषेण न निर्मितम्, जो पुरुष के द्वारा रचित नहीं है।
**पौरुषेयम्** – पुरुषेण निर्मितम्, जो पुरुष के द्वारा रचित है।
**विवृतम्** – सम्यक् निरूपितम्, ठीक प्रकार से वर्णित।
**क्रियातन्त्राः** – कर्मकाण्डकलापाः, कर्मकाण्ड।
**सार्ववर्णिकः** – सर्वेषां वर्णानां कृते उपयुक्तः, सब वर्णों के लिए उचित।
**यायावरीयः** – नाम (राजशेखरः), राजशेखर।
**सुपर्णा (वैदिक प्रयोग)** – खगौ, दो पक्षी।
**सयुजा (वैदिक प्रयोग)** – सहचरौ, एक साथ रहने वाले।
**परिषस्वजाते** – आलिङ्गत (सेवेते) आलिङ्गन करते हैं (निवास करते हैं)।
**पिप्पलम्** – फलम्, फल।
**अनश्नन्** – अखादन्, न खाता हुआ।
**अत्ति** – खादति, खाता है
**अभिचाकशीति** – प्रकाशते, प्रकाशित होता है।
**निष्पत्तिः** – उत्पत्तिः, उत्पत्ति।
**निर्णयिनी** – निर्णयिका, निर्णय करने वाली।
**आपिशलि** – नाम, नाम
**अधीतानाम्** – पठितानाम्, पढ़े हुओं का।
**अन्वाख्यानम्** – प्रकृतिप्रत्ययविभाजनम्, प्रकृति प्रत्यय विभाग द्वारा शब्दार्थ ज्ञान।
**पुरस्तात्** – पूर्वम्, पहले।
**आख्यानम्** – प्रवचनम्, कथन।
**उपनिबन्धनम्** – संग्रहणम्, संग्रह।
**परिक्रिया** – यत्र एकनायकेन सम्बद्धा कथा वर्णिता, जहाँ एक नायक से सम्बन्धित कथा वर्णित हो (यथा रामायण)।
**पुराकल्प** – यत्र बहुनायकसम्बद्धा कथा, जहाँ अनेक नायकों से सम्बन्धित कथा हो (जैसे महाभारत)।
**विवेक्त्री** – विवेचिका, विवेचन करने वाली

© NCERT not to be republished

# अभ्यासः

**1. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत–**

(क) वाङ्मयस्य उभौ भेदौ लिखत?
(ख) अपौरुषेयं किम् अस्ति?
(ग) विवृत्तक्रियातन्त्राः के सन्ति?
(घ) ब्राह्मणं केषां स्तुतिनिन्दाव्याख्यानविनियोगं च करोति ?
(ङ) वेदाः कति सन्ति? तेषां नामानि लिखत।
(च) षडङ्गानां नामानि लिखत।
(छ) व्याकरणं किं कथ्यते?

**2. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत–**

(क) <u>शब्दानाम्</u> अन्वाख्यानं व्याकरणम्।
(ख) <u>पुराणं</u> पौरुषेयम् अस्ति।
(ग) <u>ज्योतिषं</u> ग्रहगणितम् अस्ति।
(घ) <u>इतिहासः</u> पुराणप्रभेदोऽस्ति।
(ङ) <u>मीमांसा</u> सहस्रेण न्यायैः निगमवाक्यानां विवेक्त्री अस्ति।

**3. उचितां पंक्तिं मञ्जूषायाः चित्वा समक्षं लिखत–**

| |
|---|
| विवृत्तक्रियातन्त्रा, इतिहासवेदः धनुर्वेदः गन्धर्वः आयुर्वेदः च, द्विविधामन्त्राः ब्राह्मणञ्च, अपौरुषेयं पौरुषेयं च, शास्त्रं काव्यं च |

(क) वाङ्मयम् उभयथा – .................................
(ख) शास्त्रं द्विधा – .................................
(ग) श्रुतिः – .................................
(घ) मन्त्राः – .................................
(ङ) उपवेदाः – .................................

**4. उचितमेलनं कुरुत–**

| | | |
|---|---|---|
| (क) चत्वारि शास्त्राणि | – | ज्योतिषम् |
| (ख) शब्दानामन्वख्यानम् | – | पुराणम् |
| (ग) मन्त्राणां विनियोजकं सूत्रं | – | कल्पः |
| (घ) पौरुषेयं | – | व्याकरणम् |
| (ङ) ग्रहगणितम् | – | पुराणम्, आन्वीक्षिकी, मीमांसा, स्मृतितन्त्रम्। |

**5. उचितविभक्तिं प्रयुज्य संख्यावाचिशब्दानां प्रयोगं कुरुत–**

(क) ...................... वेदाः। (चतुर्)



© NCERT not to be republished

(ख) ...................... अङ्गानि। (षट्)
(ग) ...................... शास्त्राणि। (चतुर्)
(घ) ...................... नायकः। (एक)
(ङ) ...................... पुराणानि। (अष्टादश)

**6. अव्ययपदानि चित्वा लिखत–**

(क) जगतो यत्र निबद्धं तद्विज्ञेयं पुराणम्। – ..................
(ख) पुराणप्रभेद एव इतिहासः। – ..................
(ग) अष्टादश एव श्रुत्यर्थस्मरणात्स्मृतयः। – ..................
(घ) स च द्विधा परिक्रियापुराकल्पाभ्याम्। – ..................
(ङ) तत्र वर्णानां स्थान–करण–प्रयत्नादिभिः
निष्पत्ति निर्णयिनी शिक्षा। – ..................

**7. सन्धिं कुरुत–**

(क) ब्राह्मणम्+च – ................................
(ख) आथर्वणः+च – ................................
(ग) वेद+आत्मा – ................................
(घ) अष्टादश+एव – ................................
(ङ) छन्दांसि+अगीतानि – ................................

**8. निम्नलिखितशब्दानां सहायतया वाक्यप्रयोगं कुरुत–**

इह, वेदाः, अत्ति, अनश्नन्, एव

**9. विपरीतार्थकपदं लिखत–**

(क) पौरुषेयम् – ................................
(ख) एकः – ................................
(ग) यत्र – ................................
(घ) यत् – ................................
(ङ) यथा – ................................

## योग्यताविस्तारः

अयं पाठः काव्यमीमांसायाः सङ्गृहीताः। अस्मिन् पाठे अष्टादश काव्यविद्यायाः वर्णनम् अस्ति। यथा–
**शास्त्रसङ्ग्रहः**
**शास्त्रनिर्देशः**
**काव्यपुरुषोत्पत्तिः**
**पदवाक्यविवेकः**
**पाठप्रतिष्ठा**

**अर्थानुशासनं**
**वाक्यविधय:**
**कविविशेष:**
**कविचर्या**
**राजचर्या**
**काकप्रकारा:**
**शब्दार्थाहरणोपाया:**
**कविसमय:**
**देशकालविभाग:**
**भुवनकोश:**
**कविरहस्यम्**
**प्रथममधिकरणम्**

© NCERT not to be republished